क्षेमे योगे हव्य इन्द्रः' इति, तथा, "ईशानम् अस्य जगतः स्व ईशम् ईशानम् इन्द्र! तस्थुषे" इति। तथा, स्तुत्युपचाराभ्यां प्रसीदति इत्युपगच्छामः, एवं हि स्मरन्ति, प्रसीदति देवता इति। तथा उपचरन्ति, प्रसन्नोऽस्य पशुपतिः, पुत्रोऽस्य जातः, प्रसन्नोऽस्य वैश्रवणो धनम् अनेन लब्धम् इति। तथा अन्यार्थदर्शनं भवति, आहुतिभिरिव हुतादौ देवान् प्रीणाति' इति, तस्मै प्रीता इषमूर्जं नियच्छन्ति' इति" भा०। "ततश्च तेन सम्बन्धः" सू०। "ततो" देवतायाः, तेन फलेन सम्बन्धः परिचरितुर्भवति, यो देवताम् इज्यया परिचरति, तं सा फलेन सम्बध्नाति। कथम् एतत् अवगम्यते?। स्तुत्युपचाराभ्यां स्मरन्ति हि, देवता यष्टुः फलं ददाति इति, तामेव उपचारेण स्तुतिं द्रढयति, पशुपतिः, अनेनउपचरितः पुत्रोऽनेन लब्धः इति। तथा अन्यार्थदर्शनम् इममेव अर्थं दर्शयति, "स, इत् जनेन स विशा स जन्मना स पुत्रैर्वाजम्भरते धना नृभिः। देवानाम् यः पितरमाविवासति श्रद्धामना हविषा ब्रह्मणस्पतिम्" इति तथा, "तृप्त एवैनम् इन्द्रः प्रजया पशुभिः तर्पयति" इति तस्मात् हविर्दानेन गुणवचनैश्च देवता आराध्यते, सा प्रीता सती फलं प्रयच्छति येन कर्म्मणा अग्निराराधितः, तस्य फलस्य दृष्टे, तत् कर्त्रे प्रयच्छति, न तत् स्वयं प्रदातुमर्हति, वचनादेतत् अवगम्यते। कः किं प्रयच्छति? इति यथा अग्नौ वचनं, न तत् स्वयं" भा०। "अपि वा शब्दपूर्व्वत्वाद्यज्ञकर्म प्रधानं स्याद्गुणत्वे देवताश्रुतिः" सू०। "अपि वा इति पक्षो व्यावर्त्त्यते। न चैतदस्ति यदुक्तं देवता प्रयोजिका" इति, "यज्ञकर्म्म प्रधानं स्यात्" यजतेर्जातम् अपूर्व्वम्। कुतः?। "शब्दपूर्व्वत्वात्", यत् हि फलं ददाति, तत् प्रयोजकम् इदं फलं ददाति इत्येतत् ज्ञानं शब्दपूर्व्वकं न प्रत्यक्षादिभिः अवगम्यते, शब्दश्च यजतिवाच्यात् फलम् आह, न देवतायाः। कथम् अवगम्यते?। दर्शपूर्णमासयोः करणत्वेन निर्द्देशः "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इति, तथा, "ज्योतिष्टोमेन स्वर्गकामो यजेत" इति, यजत्यर्थस्य हि स्वर्गकामेन समभिव्याहारो न देवतायाः। "ननु द्रव्यदेवताक्रियं यजत्यर्थः"। सत्यमेव, किन्तु "गुणत्वे देवताश्रुतिः", द्रव्यदेवतं हि भूतं, भावयितव्यो यजत्यर्थः, भूतभव्यसमुच्चारणे च भूतं भव्याय उपदिश्यते, तस्मात् न देवता प्रयोजिका। अथ यदुक्तं "कर्मण ईप्सितादभिप्रेततरम्" इति न अस्य अभिप्रेतताम् अपह्नुमहे, तद्धितशब्देन चतुर्थ्या वा संयुक्तस्य देवतार्थस्य वाक्यात् अभिप्रेतता अवगम्यते,। फलसंयोगस्तु वाक्यादेव यजत्यर्थस्य। तस्य च श्रुत्या करणता अवगम्यते, न देवतायाः। तत्र यद्यपि देवतार्थता यागस्य गम्यते। फलार्थतापि तेन न प्रतिषिध्यते, फलं च पुरुषार्थः पुरुषार्था च नः प्रवृत्तिः, न च असौ देवतायाः, तस्मात् न देवताप्रयुक्ताः प्रवर्त्तिष्यामहे, या तु, सम्प्रदानस्य अभिप्रेतता सा फलवतो यजेः, साधनत्वे सति उपपद्यते। यच्च,—यजिर्देवतापूजा सा पूज्यमानप्रधाना लोके लक्ष्यते—इति, न लोकवत् इह भवितव्यम्, इह पूज्यमानपूजा प्रधानं, यत् हि फलवत् तत् प्रयोजकं, तस्मात् यज्ञकर्म प्रयोजकम्। अपिच, एतस्मिन् पक्षे विग्रहवती देवता भुङ्क्ते च—इति अध्यवसनीयं भवति, न हि अविग्रहायै अभुञ्जनायै च दानं भोजनं वा सम्भवति—इति"। यच्च उक्तं स्तुत्युपचारान्यार्थदर्शनैर्विग्रहवती, भुङ्क्ते च—इति। तन्न, स्तुतेर्मन्त्रार्थवादमूलत्वात्,—मन्त्रेभ्यश्च अर्थवादेभ्यश्च स्तुतिमूलं विज्ञानम् उत्पद्यते—इति प्रत्यक्षम् अवगम्यते, ते च मन्त्रार्थवादा नैवंपराः—इत्येतत् वक्ष्यामः। आह, 'यदि नैवंपरा न तर्हि मन्त्रार्थवादमूलं तद्विज्ञानम्'—इति। उच्यते,—ये आलोचनमात्रेण मन्त्रार्थवादान् पश्यन्ति, तेषाम् तत् स्तुतिमूलम् ये पुनर्निपुणतः पश्यन्ति, तेषां तत् बाधितम्। अपि च कस्यचित् स्तुतिमूलं भवति। तस्मात् ततः एव स्तुतिः। उपचारोऽपि स्तुतिमूल एव। यत्तु अन्यार्थदर्शनम्, उक्तं—'जगृभ्मा ते दक्षिणम् इन्द्र! हस्तम्'—इति। नैतत् एवम्परं,—इन्द्रस्य हस्तो विद्यते—इति" यः तस्य दक्षिणो हस्तस्तं वयमगृहीतवन्त इति। तस्मात् वाक्यात् इन्द्रस्य हस्तसत्ता न प्रतीयते। आह, 'यदि त्वसौ नास्ति, वयं ते हस्तं गृहीतवन्तः—इत्येवं न अवकल्पते—इति हस्तसत्ता अध्यवसीयते,—अस्त्यसौ हस्तः, वयं यं गृहीतवन्तः'—इति। तन्न उपपद्यते यद्यप्यस्य हस्तो भवेत्, तथापि न तम् उपगृहीतवन्तः—इति प्रत्यक्षमेतत्, तथाप्येतन्न अवकल्पत एव, तत्र एतत् असम्बद्धं वा अवकल्पयितव्यं, स्तुतिर्वा, तच्च मत्पक्षेऽपि तुल्यम्। अथ एवम् उच्यते,—'तस्य एतद्वचनं, यो गृहीतवान् तस्य हस्तम्'—इति। उच्यते, नैतत् अध्यवसेयम्, आदिमत्तादोषो वेदस्य प्रसज्येत, न च, गृहीतवान् आसीत्—इत्युच्यते, प्रमाणाभावात्। 'एतस्मात् एव वचनात् अर्थात्